पीड़या। प्रतिरूपेण कृत्रिमरत्नादिना। साहसेन समुद्रयानगिर्य्यारोहणादिना। व्याजेन ब्राह्मणवेशेन शूद्रादिना। तथ्यां तामसम् ॥ * ॥ राजसधनं यथा,—

'कुसीदकृषिवाणिज्यशुल्कगानानुवृत्तिभिः।
कृतोपकारादाप्तञ्च राजसं समुदाहृतम् ॥'

अनुवृत्त्या सेवया ॥ * ॥ सात्त्विकधनं यथा,—

'श्रुतशौर्य्यतपःकन्याशिष्ययाज्यान्वयागतम्।
धनं सप्तविधं शुद्धं मुनिभिः समुदाहृतम् ॥'

श्रुतेनाध्ययनेन। शौर्य्येण जयादिना। तपसा जपहोमदेवार्च्चादिना। कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धम्। शिष्यागतं गुरुदक्षिणादिना। याज्यागतं आर्त्विज्यलब्धम्। अन्वयागतं दायादेभ्यो लब्धम्। शुद्धं सात्त्विकम्।"इति शुद्धितत्त्वे देवलनारदौ ॥ * ॥ धनप्रयोगनक्षत्राणि यथा, अश्विनी। पुनर्व्वसुः। पुष्यः। उत्तरफल्गुनी। हस्ता। पूर्व्वाषाढ़ा। उत्तराषाढ़ा। श्रवणा। धनिष्ठा। शतभिषा। उत्तरभाद्रपत्। रोहिणी। इति ज्योतिषम् ॥ * ॥ धनप्रयोगनिषेधो यथा,

"आर्द्रं यमद्वन्द्वमहित्रयञ्च
शक्रद्वयं वातयुगं महेशः।
कार्य्यो न चैतेषु धनप्रयोगो
दत्तो गतो याद्यन्दयं न देयम् ॥"

इति समयप्रदीपः ॥

अर्थप्रशंसा यथा,—

"अर्थेभ्योऽथ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः।
क्रियाः सर्व्वाः प्रवर्त्तन्ते पर्व्वतेभ्य इवापगाः ॥
अर्थेन हि विमुक्तस्य पुरुषस्याल्पचेतसः।
विच्छिद्यन्ते क्रियाः सर्व्वा ग्रीष्मे कुसरितो यथा ॥
सोऽयमर्थं परित्यज्य सुखकामः सुखेधितः।
पापमाचरते कर्त्तुं तदा दोषः प्रवर्त्तते ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः ॥
यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान्।
यस्यार्थाः स महाबाहुर्यस्यार्थाः स गुणाधिकः ॥
अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया।
राज्यमुत्सृजता धीर! येन बुद्धिस्त्वया कृता ॥
यस्यार्था धर्म्मकामार्थास्तस्य सर्व्वं प्रदक्षिणम्।
अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ॥
हर्षः कामश्च दर्पश्च धर्म्मः क्रोधः शमो दमः।
अर्थादेतानि सर्व्वाणि प्रवर्त्तन्ते नराधिपे ॥
येषां नश्यत्ययं लोकश्चरतां धर्म्मचारिणाम्।
तेऽर्थास्त्वयि न दृश्यन्ते दुर्द्दिनेषु यथा ग्रहाः ॥
इति रामायणे युद्धकाण्डे श्रीरामं प्रति श्रीलक्ष्मणवाक्यम् ॥ * ॥

अर्थनिन्दा यथा,—

"अर्थमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यम्।
पुत्त्रादपि धनभाजां भीतिः
सर्व्वत्रैषा विहिता नीतिः ॥"

इत्यादि मोहमुद्गरे द्रष्टव्यम् ॥ * ॥

अनुग्रहार्थं भगवता धनहरणम्। यथा,—

"राजन् यमनुगृह्णामि हरिष्ये तद्धनं शनैः।
ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम् ॥"

इति श्रीभागवतम् ॥

धनकेलिः, पुं, ( धनैः केलिः क्रीड़ा यस्य। ) कुवेरः। इति त्रिकाण्डशेषः ॥

धनच्छूः, स्त्री, ( धनं छ्यति नाशयतीति। छो य लूनौ+बाहुलकात् ऊः। ) करेटुपक्षी। इति त्रिकाण्डशेषः ॥

धनञ्जयः, पुं, ( धनं जयति सम्पादयतीति। जि+खच्+मुम्। "धनमिच्छेत् हुताशनात्।" इत्युक्तेरस्य तथात्वम्। ) अग्निः। चित्रकवृक्षः। इत्यमरः। १। १। ५६ ॥ ( धनं जयति अरीन् निर्जित्य अर्ज्जयतीति। जि+खच्+मुम् च। ) अर्ज्जुनः। ( अस्य निरुक्तिर्यथा, महाभारते। ४। ४२। १३।

"सर्व्वान् जनपदान् जित्वा वित्तमाश्रित्य केवलम्।
मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम् ॥" )

नागभेदः। स तु जलाशयाधिपतिः। ( यथा, महाभारते। २। ६। ६।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ।
मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ ॥" )

देहमारुतः। स च शरीरवाह्यपञ्चवायन्तर्गतः। इति मेदिनी। ये, १२० ॥ ( "धनञ्जयः पोषणकारः।" इति वेदान्तसारः। ३३ ॥

"न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः ॥"

इति सुबोधिनी ॥ )

"धनञ्जयस्तथा घोषे महारजतवर्णकः।
ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु ॥"

इति शारदातिलकटीकायां राघवभट्टः ॥ अर्ज्जुनवृक्षः। इति रत्नमाला ॥ * ॥ ( गोत्रविशेषः। तद्वंशीये, त्रि। यथा, महाभारते। २। ३३। ३४।

"धनञ्जयानामृषभः सुसामा सामगोऽभवत् ॥"

विष्णुः। यथा, महाभारते। १३। १४६। ८३।

"अनिर्द्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥"

"यत् दिग्विजये धनं प्रभूतं अजयत्तेन धनञ्जयः। 'पाण्डवानां धनञ्जयः।' इति भगवद्वचनात्।" इति शाङ्करभाष्यम् ॥ षोड़शद्वापरस्य व्यासः। यथा, देवीभागवते। १। ३। ३०।

"त्र्यारुणिः पञ्चदशे षोड़शे तु धनञ्जयः ॥" )

धनदः, पुं, (धनं दयते पालयतीति। दे ङ पालने+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। ) कुवेरः। इत्यमरः। १। १। ७२ ॥ ( यथा, देवीभागवते। ५। ३। ४०।

"त्रिविष्टपं ग्रहीष्यामि जित्वेन्द्रं वरुणं यमम्।
धनदं पावकञ्चैव चन्द्रसूर्य्यौ विजित्य च ॥"

ब्रह्मा अस्य तपसा सन्तुष्ट एनं धनेशं चकार। यथा, अध्यात्मरामायणे। ७। १। ३८।

"ददौ तत्तपसा तुष्टो ब्रह्मा तस्मै वरं शुभम्।
मनोऽभिलषितं तस्य धनेशत्वमखण्डितम् ॥" )

हिज्जलवृक्षः। इति राजनिर्घण्टः ॥ ( धनदः आश्रयित्वेनास्त्यस्येति अच्। हिमवत एकदेशः। यथा, महाभारते। १३। १६। २६।

"धनदं समतिक्रम्य हिमवन्तञ्च पर्व्वतम् ॥"

धनं ददातीति। दा+कः। ) दातरि, त्रि। इति मेदिनी। दे, ३२ ॥ ( यथा, कामन्दकीयनीतिसारे। ३। २३।

"उद्वेजयति भूतानि क्रूरवाक् धनदोऽपि सन् ॥")

धनदाक्षी, स्त्री, ( धनदस्य कुवेरस्य अक्षि इव पिङ्गलं पुष्पं यस्याः। षच् समासे। स्त्रियां ङीष्। ) लताकरञ्जः। इति राजनिर्घण्टः ॥

धनदानुजः, पुं, (धनदस्य कुवेरस्य अनुजः कनिष्ठः।) रावणः। इति शब्दरत्नावली ॥ ( यथा, रघुः। १२। ५३।

"निग्रहात् स्वसुराप्तानां वधाच्च धनदानुजः।
रामेण निहितं मेने पदं दशसु मूर्द्धसु ॥" )

धनदायी, [ न् ] पुं, (धनं ददाति उपासकायेति। दा+णिनिः। "धनमिच्छेत् हुताशनात्।" इति वचनादेवास्य तथात्वम्। ) अग्निः। इति शब्दरत्नावली ॥ धनदातरि, त्रि ॥

धनन्ददा, स्त्री, (शेन धनेन नन्दं आनन्दं ददातीति। दा+कः। ) बुद्धशक्तिभेदः। इति त्रिकाण्डशेषः ॥

धनपतिः, पुं, ( धनानां पतिः। ) कुवेरः। इति धनञ्जयः ॥ ( यथा, महाभारते। २। १२। ३।

"तथा धनपतेर्यक्षा गुह्यका राक्षसास्तथा ॥" )

अस्य उत्पत्तिर्यथा,—

महातपा उवाच।

"शृणु चान्यां वसुपतेरुत्पत्तिं पापनाशिनीम्।
यथा वायुः शरीरस्थो धनदः सम्बभूव ह ॥
आद्यं शरीरं यत्तस्मिन् वायुरन्तःस्थितोऽभवत्।
प्रयोजनान्मूर्त्तिमत्त्वमादिशन् क्षेत्रदेवताः ॥
तत्रामूर्त्तस्य वायोस्तु उत्पत्तिः कीर्त्त्यते मया।
तां शृणुष्व महाभाग! कथ्यमानां मयानघ! ॥
ब्रह्मणः सृजतः सृष्टिं मुखाद्वायुर्विनिर्ययौ।
प्रचण्डशर्कराववर्षी तं ब्रह्मा प्रत्यषेधयत् ॥
मूर्त्तो भवस्व शान्तश्च तचोक्तो मूर्त्तिमान् भवन्।
सर्व्वेषाञ्चैव देवानां यद्वित्तं फलमेव च ॥
तत् सर्व्वं पाहि· चोक्तं तस्माद्धनपतिर्भवेत्।
तस्य ब्रह्मा ददौ तुष्टस्तिथिमेकादशीं प्रभुः ॥
तस्यामनग्निपक्वाशी यो भवेन्नियतः शुचिः।
तस्यासु धनदो देवस्तुष्टः सर्व्वं प्रयच्छति ॥
एषा धनपतेर्मूर्त्तिः सर्व्वकिल्बिषनाशिनी।
य एतां शृणुयाद्भक्त्या पुरुषः पठतेऽपि वा ॥
सर्व्वकाममवाप्नोति स्वर्गलोकञ्च गच्छति ॥"

इति वराहपुराणम् ॥

धनपिशाचिका, स्त्री, ( धने पिशाचिकेव। ) धनाशा। तत्पर्य्यायः। तृष्णा २। इति हारावली। १२५ ॥

धनपिशाची, स्त्री, ( धने पिशाचीव। ) तृष्णा। धनलोभः। इति त्रिकाण्डशेषः ॥

धनप्रिया, स्त्री, ( धनवत् प्रिया। ) काकजम्बूः। इति राजनिर्घण्टः ॥